तीरे वसेन्नित्यं गङ्गातोयं पिबेत् सदा। दीक्षितः सर्वयज्ञेषु सोमपानं दिने दिने। गङ्गातोयाभिसंसिक्तां भिक्षामश्नाति यो नरः। सर्पवत् कञ्चुकं मुक्त्वा पापानीह नरोत्तमः। स्वार्गापवर्गिकीं सिद्धिं प्राप्नोत्येव न संशयः" स्कान्दे "गण्डूषमात्रपानेन अश्वमेधफलं लभेत्। स्वच्छन्दं यः पिबेदम्भस्तस्य मुक्तिः करे स्थिता" पाद्मे "त्रिभिः सारस्वतं तोयं सप्तभिश्चैव यामुनम्। नार्मदं दशभिर्मासैर्गाङ्गं वर्षेण जीर्य्यति" अथ वासरूपसेवाप्रकरणम्। ब्राह्मे "तपसा ब्रह्मचर्य्येण यज्ञैस्त्यागेन वा गतिम्। न तां संलभते जन्तुर्गङ्गां संसेव्य यां लभेत्" नारदीये "किमष्टाङ्गेन योगेन किं तपोभिः किमध्वरैः। वास एव हि गङ्गायां ब्रह्मज्ञानस्य कारणम्" महाभारते "पूर्वे वयसि कर्माणि कृत्वा पापानि ये नराः। पश्चाद्गङ्गां समाश्रित्य तेऽपि यान्ति परां गतिम्" ब्रह्माण्डे "महापातकिनो ये च सेवन्ते यदि जाह्नवीम्। पातकेभ्योऽपि मुच्यन्ते का कथाऽन्यस्य पाप्मनः" भविष्ये "त्रिरात्रं सप्तरात्रं वा स्थितिमात्रेण भक्तितः। गङ्गातीरे नरो यस्तु नरकं स न पश्यति"। विघ्नप्रकरणम् भविष्ये "षष्टिर्विघ्नसहस्राणि गङ्गां रक्षन्ति यत्नतः। निराशयन्त्यभक्तांश्च पापकर्मरतांस्तथा। कामक्रोधमदोन्माहलोभादिनिशितैः शरैः। प्रहरन्ति मनस्तेषां स्थितिं वै नाशयन्ति च" प्रतिग्रहप्रकरणम् मात्स्ये "यस्तत्र प्रतिगृह्णाति तीर्थेष्वायतनेषु च। हिरण्यं रजतं ताम्रं यच्चान्यद्वस्तु किञ्चन। निःफलं तस्य तत् तीर्थं यावत्तद्वस्तु चाश्नुते। वरं विक्रयणं मातुर्वरं विक्रयणं पितुः। अपि गङ्गाजलस्थन्तु न गृह्णीयात् कदाचन" स्मृतिः। "गङ्गाविक्रयणाद्राजन् विष्णोर्विक्रयणं भवेत्। जनार्दने तु विक्रीते विक्रीतं स्याज्जगत्त्रयम्" अभक्तिप्रकरणम् भविष्ये "गङ्गां प्राप्याथ ये मर्त्याः श्रद्धां भक्तिं न कुर्वते। तीर्थान्तरे रतिं कुर्य्युस्ते वै निरयगामिनः"। कृतकृत्यप्रकरणम् ब्रह्माण्डे "गङ्गां संश्रित्य यस्तिष्ठेत्तस्याकार्य्यं न विद्यते। कृतकृत्यः स वै मुक्तो जीवन्मुक्तो भवेन्नरः"। मृत्युफलप्रकरणम् ब्राह्मे "ज्ञानतोऽज्ञानतो वापि कामतोऽकामतोऽपि वा। गङ्गायान्तु मृतो मर्त्यो मोक्षं स्वर्गञ्च विन्दति" भविष्ये "कृमिकीटपतङ्गाद्या ये मृता जाह्नवीजले। कूलाच्चिप्रपतिता वृक्षास्तेऽपि यान्ति परां गतिम्" तथा "अपि योजनपर्य्यन्ते गङ्गां स्मृत्वा तनुं त्यजेत्। वैवस्वतोऽपि तस्यार्घ्यं दत्त्वा स्वर्गं प्रयच्छति" स्कान्दे "अर्द्धोदके तु जाह्नव्या म्रियतेऽनशनेन यः। स याति न पुनर्जन्म ब्रह्मसायुज्यमेव च" अस्थिप्रक्षेपप्रकरणम् वनपर्वणि कौर्मे च "यावन्त्यस्थीनि गङ्गायां तिष्ठन्ति पुरुषस्य च। तावद्वर्षसहस्राणि ब्रह्मलोके महीयते। यावदस्थि मनुष्यस्य गङ्गायाः स्पृशते जलम्। तावद्वर्षसहस्राणि स्वर्गलोके महीयते" ब्रह्माण्डे "गङ्गातोये तु यस्यास्थि नीत्वा संक्षिप्यते नरैः। तत्कालमादितः कृत्वा स्वर्गे तस्य भवेत् स्थितिः। गङ्गातोयेषु यस्यास्थि प्लाव्यते पुण्यकर्मणः। न तस्य पुनरावृत्तिर्ब्रह्मलोकात् कदाचन" केशादिप्रकरणम् ब्रह्माण्डे "केशलोमनखादीनि येषां पुंसान्तु वायुना। निक्षिप्यन्ते च गङ्गायां तेषां स्वाद्दियति स्थितिः" अथ प्रकीर्णकम् ब्रह्माण्डे "दृष्ट्वा शतकृतं पापं स्पृष्ट्वा जन्मशतानि च। स्नात्वा जन्मसहस्राणि हन्ति गङ्गा कलौ युगे"। गङ्गाद्वारवाराणसीप्रयागादिप्रकरणम् मात्स्ये "सर्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा। गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे" वनपर्वणि "स्वर्गद्वारेण तत्तुल्यं गङ्गाद्वारं न संशयः। तत्राभिषेकं यः कुर्य्यात् सोऽश्वमेधमवाप्नुयात्" ब्रह्माण्डे वाराणस्यां विशेषेण गङ्गा नित्यं विमुक्तिदा। अनन्तकोटिकल्पोत्थं पापं पुंसां प्रणाशयेत्। वाराणस्यां विशेषेण सद्यः पापविनाशिनी। गङ्गायान्तु जले मोक्षो वाराणस्यां जले स्थले। जले स्थले चान्तरीक्षे गङ्गासागरसङ्गमे"। मोक्षप्रकरणम् स्कान्दे "ब्रह्मादिदेवलोकानां मुक्तेश्च प्राप्तये नृणाम्। गङ्गा च परमा हेतुः कलिकाले विशेषतः"।

गङ्गामाहात्म्यं काशीख० विष्णुं प्रति शिवेनोक्तम् यथा

"ममैव सा परा मूर्त्तिस्तोयरूपा शिवात्मिका। ब्रह्माण्डानामनेकेषामाधारः प्रकृतिः परा। शुद्धविद्यास्वरूपा च त्रिशक्तिः करुणात्मिका। आनन्दाऽमृतरूपा च शुद्धधर्मस्वरूपिणी। तामेनां जगतां धात्रीं धारयामि स्वलीलया। विश्वस्य रक्षणार्थाय पर ब्रह्मस्वरूपिणीम्। त्रैलोक्ये यानि तीर्थानि पुण्यक्षेत्राणि यानि च। सर्वत्र सर्वे ये धर्म्माः सर्वे यज्ञाः सदक्षिणाः। तपांसि विष्णो! सर्वाणि श्रुतिः साङ्गा चतुर्मिता। अहञ्च त्वञ्च ब्रह्मा च देवतानां गणाश्च ये। पुरुषार्थाश्च सर्वे वै शक्तयो विविधाश्च याः। गङ्गायां सर्वे एवैते सूक्ष्मरूपेण संस्थिताः। स स्नातः सर्व-